योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०५२

द्विपञ्चाशः सर्गः ५२

श्रीवसिष्ठ उवाच ।

यो जीवस्यादितः स्वप्नो नानाकलनकोमलः ।

तमिमं विद्धि संसारं न सत्यं नाप्यसन्मयम् ।। १

न पुंस इव जीवस्य स्वप्नः संभवति क्वचित् ।

तेनैते जाग्रतो भावा जाग्रत्स्वप्नकृतोऽत्र हि ।। २

जीवस्वप्नमिमं दीर्घं क्षिप्रताप्रतिभासतः ।

असत्यमप्यवस्तुत्वाद्विद्धि वेद्यविदां वर ।। ३

स्वप्नात्स्वप्नान्तरमिव गच्छन्तो जीवजीवकाः ।

असत्यमेव पश्यन्ति घनसत्यतयानघ ।। ४

अजडे जडता तात जडे चाजडतोदिता ।

असत्ये सत्यता जीवजीवानुभवमोहतः ।। ५

भानोरप्यन्तरखिलं पश्यन्तस्त्रिजगद्भ्रमम् ।

भ्रमन्ति स्वप्नसंभ्रान्ता इव जीवा भिदालिभिः ।। ६

सर्वगत्वादनन्तत्वात्स्वस्य जीवस्य जीवतः ।

यद्भावयन्ति चेतन्ति तदेवाश्विति सत्यवत् ।। ७

पुण्डरीकाक्षनिर्दिष्टामसंसक्तिगतिं शुभाम् ।

यामालिङ्ग्य महाबाहो जीवन्मुक्तो महामुनिः ।। ८

पाण्डोः पुत्रोऽर्जुनो नाम सुखं जीवितमात्मनः ।

क्षिपयिष्यति निर्दुःखं तथा क्षेपय जीवितम् ।। ९

श्रीराम उवाच ।

भविष्यति कदा ब्रह्मन्सोऽर्जुनः पाण्डुनन्दनः ।

कीदृशीं च हरिस्तस्य कथयिष्यत्यसक्तताम् ।। १०

श्रीवसिष्ठ उवाच ।

अस्ति सन्मात्रमात्मेति परिकल्पितनामकम् ।

स्थितमात्मन्यनाद्यन्ते नभसीव महानभः ।। ११

दृश्यते विमले तस्मिन्नयं संसारविभ्रमः ।

कटकादि यथा हेम्नि तरङ्गादि यथाम्भसि ।। १२

चतुर्दशविधा भूतजातयः प्रस्फुरन्त्यलम् ।

तस्मिन्संसारजालेऽस्मिञ्जाले शकुनयो यथा ।। १३

तत्रैते यमचन्द्रार्कशक्राद्याः शंसितक्रमाः ।

भूतपञ्चकसंसारलोकपालत्वमागताः ।। १४

इदं पुण्यमुपादेयं हेयं पापमिदं त्विति ।

तैः स्वसंकल्पघटिताद्वेदनात्स्थापिता स्थितिः ।। १५

तस्याद्य यावदनघ प्रवाहपतिते निजे ।

कर्मण्यचलसंकाशस्थिरं चित्तमवस्थितम् ।। १६

भगवान्स यमः किंचिद्गते प्रतिचतुर्युगे ।

तपः प्रकुरुते भूतदलनात्पापशङ्कया ।। १७

कदाचिदष्टौ वर्षाणि दश द्वादश वापि च ।

कदाचित्पञ्चसप्तादि कदाचित्षोडशापि च ।। १८

उदासीनवदासीने तस्मिन्नियमसंस्थितौ ।

न हिनस्ति जगज्जाले मृत्युर्भूतानि कानिचित् ।। १९

तेन नीरन्ध्रभूतौघनिःसंचारं महीतलम् ।

भवति प्रावृषि स्वेदी कुञ्जरो मशकैरिव ।। २०

अथैतानि विचित्राणि भूतानि बहुयुक्तिभिः ।

क्षिपयन्ति सुरा राम भुवो भारनिवृत्तये ।। २१

एवं युगसहस्राणि व्यवहारशतानि च ।

समतीतान्यनन्तानि भूतानि च जगन्ति च ।। २२
वैवस्वतोऽद्य तु यमो य एष पितृनायकः ।
अनेन त्वधुना साधो परिक्षीणेषु केषुचित् ।। २३
युगेष्वघविघाताय वर्षाणि द्वादशात्मना ।
व्रतचर्येह कर्तव्या दूरास्तजनकर्षणा ।। २४
तेनेयमुर्वी नीरन्ध्रा भूतैर्मर्त्यैरमृत्युभिः ।
दीना प्रपन्ना गुल्मेव भारभूतैर्भविष्यति ।। २५
भूभारपरिभूताङ्गी हरिं शरणमेष्यति ।
कान्ता दस्युपराभूता दीना पतिमिव प्रिया ।। २६
हरिर्देहद्वयेनाथ महीमवतरिष्यति ।
देवांशैरखिलैः सार्धं नरनारायणं गतैः ।। २७
वसुदेवसुतस्त्वेको वासुदेव इति श्रुतः ।
देहो भविष्यति हरेर्द्वितीयः पाण्डवोऽर्जुनः ।। २८
युधिष्ठिर इति ख्यातो धर्मपुत्रो भविष्यति ।
अम्भोधिमेखलाभूपःपाण्डोः पुत्रः स धर्मवित् ।। २९
दुर्योधन इति ख्यातस्तस्य भ्राता पितृव्यजः ।
भविष्यति दृढद्वन्द्वो भीमो बभ्रुरहेरिव ।। ३०
अन्योन्यं हरतोरुर्वीं तयोः संग्रामलोलयोः ।
अष्टादशात्राक्षौहिण्यो घटिष्यन्त्यत्र भीषणाः ।। ३१
तत्क्षयेण विभारत्वं भुवो विष्णुः करिष्यति ।
राघवाऽर्जुनदेहेन वृहद्गाण्डीवधन्वना ।। ३२
विष्णोरर्जुननामादौ प्राकृतं भावमास्थितः ।
हर्षामर्षान्वितो देहो नरधर्मा भविष्यति ।। ३३
सेनाद्वयगतान्दृष्ट्वा स्वजनान्मरणोन्मुखान् ।
विषादमेष्यत्युद्योगं युद्धाय न करिष्यति ।। ३४
तमर्जुनाभिधं देहं प्राप्तकार्यैकसिद्धये ।

हरिर्बुद्धेन देहेन बोधयिष्यति राघव ।। ३५

न जायते म्रियते वा कदाचि-

न्नायं भूत्वा भविता वा न भूयः ।

अजो नित्यः शाश्वतोऽयं पुराणो

न हन्यते हन्यमाने शरीरे ।। ३६

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।

उभौ तौ न विजानीतो नायं हन्ति न हन्यते ।। ३७

अनन्तस्यैकरूपस्य सतः सूक्ष्मस्य खादपि ।

आत्मनः परमेशस्य किं कथं केन नश्यति ।। ३८

अनन्तमव्यक्तमनादिमध्य-

मात्मानमालोकय संविदात्मन् ।

संविद्वपुः स्फारमलब्धदोष-

मजोऽसि नित्योऽसि निरामयोऽसि ।। ३९

इत्यार्षे श्रीवासिष्ठमहारामा० वा ० दे० मोक्षो० निर्वाणप्रकरणे पू० अर्जुनोपाख्याने नरनारायणावतारकथनं नाम द्विपञ्चाशः सर्गः ५२